No. १३५४

Title लिङ्गोपहित लैङ्गिक भान विचारः

Author x

Extent ३२ Age १८३०

Subject न्याय वैशेषिकं

लिंगोपद्धित लैङ्गिकमानविचारः

१३५४

३१

वानपर्वतइतिपरामर्शस्यकिंकार्यतावच्छेदकं नतावद्वह्निव्याप्यधूमप्रकारकपर्वतोद्देश्यकवह्निविधेय
कानुमितित्वं। वह्निव्याप्यधूमवन्महानसंवह्निमानालोकवांश्चपर्वतइत्यादिसमूहालंबनजन्यवह्नि
व्याप्यधूमवन्महानसंवह्निमत्त्वह्निव्याप्यालोकवान्पर्वतोवह्निमांश्चेतिसमूहालंबनानुमितौव्यभिचारा
त्। नचतत्रवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयरूपकारणस्यापिसत्त्वात्कुतोव्यभिचारावकाश
इतिवाच्यं। उपदर्शितानुमितित्वावच्छिन्नंप्रतिवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयत्वेनहेतु
त्वेवह्निव्याप्यधूमवन्महानसंपर्वतोघटवांश्चेतिसमूहालंबनादपिवह्निव्याप्यधूमवान्पर्वतोवह्निमानि
त्यनुमितिर्जायते। तथाविधानुमितिंप्रतिवह्निव्याप्यधूमप्रकारतानिरूपितपर्वतविशेष्यताशालिनिश्च
यत्वेनहेतुतायाआवश्यकतया उपदर्शितसमूहालंबनानुमितौव्यभिचारोदुरुद्धरएव। यत्तुवह्निव्याप्यधू
मवान्पर्वतइतिपरामर्शस्यकार्यतावच्छेदकंवह्निव्याप्यधूमावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरू
पितवह्निविधेयताशाल्यनुमितित्वं उपदर्शितसमूहालंबनस्थलेतथाविधाधूमावच्छिन्नपर्वतत्वावच्छि

त्वविशेष्यतानिरूपितवह्निविधेयताकानुमित्युत्पत्त्यभावेनव्यभिचारानवकाशाद्इतितदसत्।नीलपर्वतो
२ वह्निविधेयताकानुमित्युत्पत्त्यभावेनव्यभिचारानवकाशादितितदसत्नीलपर्वतोवह्निव्याप्यधूमाभाव
वान्पर्वतोवह्निव्याप्यधूमवांश्चेतिसमूहालंबनात्मकानुमित्युपपत्तेस्तथाविधानुमितिप्रतिपर्वतत्वा
धिरूढधर्मानवच्छिन्नधर्मानवच्छिन्नत्वरूपशुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमाभा
वप्रकारिताकस्यवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यतानिरूपितवह्निव्याप्यधूमाभावप्रकारिताशून्य
वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकज्ञानत्वेनहेतुत्वेनीलपर्वतोवह्निव्याप्यवान्नवेत्याकारकसंशया
दौवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमित्यापत्तेर्दुर्वारतयात्रप्रदर्शितानुमितित्वावच्छिन्नम्प्र
तितथाविधप्रकारिताशून्यशुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिज्ञा
नत्वेनहेतुतायांप्राग्वदप्रकृततयावह्निव्याप्यालोकवान्पर्वतोवह्निव्याप्यधूमवानित्यादिपरामर्शजन्य राम०
वह्निव्याप्यालोकवान्वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्याद्यनुमितौव्यभिचारस्यजागरूकत्वात्।ननु २

धूमपरामर्शकार्यतावच्छेदककोटावपि विशेष्यतायां वह्निव्याप्यधूमातिरिक्तपर्वतत्वातिरिक्तधर्मानवच्छिन्नत्वनिवे
शनान्नानुपपत्तिः तत्र पर्वतत्वावच्छिन्नविशेष्यतायां वह्निव्याप्यधूमातिरिक्तवह्निव्याप्यालोकेनाप्यवच्छिन्नत्वा
त्तथाविधविशेष्यतानिरूपितवह्निविधेयताशाल्यनुमित्युत्पत्त्यभावेन व्यभिचाराशनवकाशात् इति चेत्तत्र तथापि
एकत्र हृपमितिरेत्या वह्निव्याप्यधूमपर्वतत्वोभयधर्मितावच्छेदकीकृत्य वह्निव्याप्यधूमप्रकारकात् वह्निव्याप्य
धूमवान्पर्वतो वह्निव्याप्यधूमवान्नित्याकारकपरामर्शात् जायमानायां वह्निव्याप्यधूमवान् वह्निव्याप्यधूम
वान्पर्वतो वह्निमानित्यनुमितौ व्यभिचारस्य दुर्वारत्वादिति चेन्नैवं प्राचार्यमते वह्निव्याप्यधूमप्रकारतानिरू
पितपर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति
शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिनिश्चयत्वेन हेतुताकल्पनान्नानुपप
त्तिः न च धूमपरामर्शस्य तथाविधकार्यतावच्छेदकत्वेऽपि वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितेर्वह्निव्याप्य
धूमप्रकारतानिरूपितपर्वतत्वातिरिक्तवह्निव्याप्यधूमावच्छिन्नविशेष्यतानिरूपकत्वात् धूमपरामर्शत्वेनैता

३ वच्छेदकानां क्रांतत्वापत्तिः जागरूकैश्चाचार्यमते इति वाच्यं तादृशानुमितौ तथाविधविषयतायाः
सत्वेपि तद्दोषयथार्थेवत विशेष्यतायां पर्वतत्वातिरिक्तधर्मावच्छिन्नत्वरूपेण वह्निव्याप्यधूमप्रकारतानिरूपि
तत्वाननुगमेन पर्वतत्वातिरिक्तधर्मावच्छिन्नविशेष्यतारूपेण वह्निव्याप्यधूमप्रकारतानिरूपितत्व
विशिष्टविशेष्यताभिन्नायां वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतातन्निरूपितवह्नि
विधेयताशालिन्यनुमितित्वस्य धूमपक्षकार्यतावच्छेदकत्वांगीकारेण उक्तदोषानवकाशात् पर्वतत्वा
तिरिक्तधर्मावच्छिन्नविशेष्यतात्वरूपेण वह्निव्याप्यधूमप्रकारतानिरूपितत्वविशिष्टविशेष्यतात्वेन पर्वत
त्वातिरिक्तधर्मावच्छिन्नविशेष्यतात्वावच्छिन्नवह्निव्याप्यधूमप्रकारतानिरूपकताकविशेष्यतात्वेन उपदर्शि
तानुमितौ पर्वतविशेष्यताहानिर्वह्निव्याप्यधूमप्रकारतानिरूपकतायास्त्ववच्छेदकं न वह्निव्याप्यधूमावा
पर्वतो वह्निमानित्याद्यवच्छिन्नविशेष्यतात्वं तथासति तादृशानुमितेर्वह्निव्याप्यधूमवान् न वह्निव्याप्यधूमव रा०म०
कारकतापत्तिः किंतु तथाविधनिरूपकतावच्छेदकं पर्वतत्वावच्छिन्नविशेष्यतात्वमिति तथाविधानुमितेव ३

ह्निव्याप्यधूमप्रपरामर्शीयदर्शितकार्यतावच्छेदकाक्रांतत्वमक्षतमेवा एवमेकत्रद्रूपमितिरीत्यावह्निव्या
प्यधूमपर्वतत्वोभयधर्मितावच्छेदकीकृत्यवह्निव्याप्यधूमप्रकारकात्वह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्य
धूमवानित्याकारकपरामर्शाद्धेतुसत्त्वायामुपदर्शितानुमितावपिनव्यभिचारः तादृशानुमितौवह्निव्याप्यधू
मस्यवारद्वयवाहिधर्मितावच्छेदकतयामानोपगमेनपर्वतत्वातिरिक्तवह्निव्याप्यधूमावच्छिन्नविशेष्यता
त्वावच्छिन्नवह्निव्याप्यधूमप्रकारतानिरूपकाताकपर्वतविशेष्यतायाः सत्त्वेनोपदर्शितधूमपरामर्शकार्य
तावच्छेदकाक्रांतत्वाभावात् । एतेनवह्निव्याप्यालोकवान्पर्वत इत्यादिपरामर्शैरावह्निव्याप्यधूमवद्भोव
न्हभाववानित्यादिइतरवाधसहकृतेनजनितायांवह्निव्याप्यधूमवान्वह्निव्याप्यालोकवान्पर्वतेव
ह्निमानित्यानुमितावपिव्यभिचारोनिरस्तः तादृशानुमितेरपिपर्वतत्वातिरिक्तवह्निव्याप्यालोकावच्छि
न्नविशेष्यतात्वावच्छिन्नवह्निव्याप्यधूमप्रकारतानिरूपकताकपर्वतविशेष्यतात्वेनउपदर्शितकार्य
तावच्छेदकानाक्रांतत्वादिति न च तथापिवह्निव्याप्यधूमवान्पर्वत इति परामर्शात्पीतपर्वतोभावन्हभा

४ ववानिरूपादितत्वाधवत्वात्।अत्पन्नायांवह्निव्याप्यधूमवान्यीतपर्वतोवह्निमानित्यनुमितेरुपदर्शितधूम
५ परामर्शकार्यतावच्छेदकानाक्रांतत्वापत्तिराचार्यमतेइत्यौरितिवाच्यं।तादृशानुमितावेकत्रद्वयमितिरीत्याव
ह्निव्याप्यधूमयोरनयोर्वह्निधर्मितावच्छेदकत्वाभ्युपगमेनयीतस्यवह्निव्याप्यधूमवद्धर्मितावच्छेदकत्वाभा
नात्।तत्रपर्वतविशेष्यतावृत्तिवह्निव्याप्यधूमप्रकारतानिरूपकतायाःपर्वतत्वातिरिक्तधर्मविच्छिन्नविशे
ष्यतावच्छिन्नत्वाभावेनोपदर्शितधूमपरामर्शकार्यतानवच्छेदकाक्रांतत्वस्यस्पष्टत्वादितिकेचित्तुप्रा
चार्यमतेवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्याद्यनुमितौअहंशेकालीनत्वसंबंधेनवह्निव्याप्यधूमस्या
पिभानमंगीक्रियते।नचतथासतितादृशानुमितेर्वह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधूमकालीनवह्नि
मानित्याकारकतापत्तिरितिवाच्यं।पर्वतसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतातोभिन्नाकालीन
त्वसंबंधावच्छिन्नधूमवह्निव्याप्यधूमप्रकारतातत्रैवानुमितेस्तथाविधाकारत्वाभ्युपगमात्प्रकृतेतुउभयो राम०
गसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतान्यामितैवेनवह्निविशेष्यतानिरूपितकालीनत्वसंबंधावच्छिन्न ४

वह्निव्याप्यधूमप्रकारतेत्युपदर्शितानुपपत्त्यभावात् तथा च तन्मते पर्वतत्वातिरिक्तधर्मानवच्छिन्नविशे
ष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारताभिन्नकालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधू
मप्रकारतानिरूपितवह्निविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति उभयपर्वतत्वावच्छिन्नविशेष्यतानिरूपि
तवह्निव्याप्यधूमप्रकारताशालिनिश्चयत्वेन हेतुत्वकल्पनान्नानुपपत्तिः। वह्निव्याप्यालोकवान्प
र्वत इति परामर्शकाले वह्निव्याप्यधूमवदन्योन्याभाववान् इत्यादौ तत्र बाधबलात् तत्रेत्थं नायं वह्निव्याप्यधू
मवान् वह्निव्याप्यालोकवान्पर्वतो वह्निमानित्यनुमितौ च न व्यभिचारः तादृशानुमितौ एकालीनत्वसंबंधे
न वह्न्यंशे वह्निव्याप्यालोकस्यैव भानाभ्युपगमेन लिङ्गतः धूमपरामर्शकार्यतावच्छेदकधर्माभावात्।
एवं वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शात् नीलपर्वतो वह्निमानित्यादौ न व्यभिचारः सहकृतानाप्रदस्य
न्नायां वह्निव्याप्यधूमवान् पीतपर्वतो वह्निमानित्यनुमितेरपि न धूमपरामर्शकार्यतावच्छेदकानाक्रान्त
त्वप्रसंगः उपदर्शितदिशा तत्र पीतस्य वह्निव्याप्यधूमधर्मितावच्छेदकत्वाभावेन पर्वतत्वातिरिक्तधर्मान

५ 5
च्छिन्नविशेष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारताभिन्नकालीनत्वसंबंधावच्छिन्नव
ह्निव्याप्यधूमप्रकारतानिरूपितवह्निविधेयतायास्तत्राक्षतत्वादिति। एवं एकत्रद्वयरीत्या वह्निव्याप्यधूमप
र्वतत्वयोर्धर्मितावच्छेदकीकृत्य वह्निव्याप्यधूमप्रकारकानवह्निव्याप्यधूमपर्वतत्वोभयं धर्मितावच्छेदकी
कृत्य वा पर्वतो वह्निव्याप्यधूमवानित्याकारकपरामर्शजन्यमानायां वह्निव्याप्यधूमवान् वह्निव्याप्यधू
मवान्पर्वतो वह्निमानित्यनुमितावपि न व्यभिचारः तत्रानुमितौ वह्निव्याप्यधूमप्रकारताया द्वैविध्येन उपदर्शि
तधूमपरामर्शकार्यतावच्छेदकाक्रांतत्वाभावान्न यथाहि तत्र प्रथमसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रका
रतायाः पर्वतत्वातिरिक्तधर्मा॰ नवच्छिन्नविशेष्यतानिरूपितत्वेपि समानकालीनत्वसंबंधावच्छिन्नवह्निव्याप्य
धूमप्रकारताभिन्नकाद्वितीयवह्निव्याप्यधूमप्रकारतायाः कालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारता
त्वेकत्वेपि समानपर्वतत्वान्यधर्मानवच्छिन्नविशेष्यतानिरूपितानतस्याः पर्वतत्वातिरिक्तवह्निव्याप्यधूमावच्छि राम॰
न्नविशेष्यतानिरूपितानहूपितत्रशुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्निव्याप्य ५

धूमप्रकारत्वाभिन्नकालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारत्वाभावेनानिरूढधूमपरामर्शो कार्यतावच्छेद
कत्वाभावाद्व्यभिचारानवकाश इति वदंति। तदतीवमंदं। तथासति धूमःकालीनत्वसंबंधेनवह्निहितिरित्यवृत्ति
त्वग्रहदशायांस्वाचार्यमतेस्वानुमित्यपलापापत्तेः सत्वात् वह्निव्याप्यधूमाभाववान्पर्वत इति बाधबुद्धिद
शायांतथाविधानुमित्यपलापस्य इष्टापत्तिरिव तथाविधानुमितित्वज्ञानकालेपिस्वाचार्यमते तादृशानुमिते
रपलापस्यापीष्टापत्तिर्नविरुद्धेतिवाच्यं धूमपरामर्शजन्यानुमितौ वह्निव्याप्यधूमादिविषयकत्वानंगीकारे
कवह्न्यनुमितिप्रतिधूमपरामर्शहेतुतायाः व्यभिचारेणास्वसंभवेन तत्रतद्विषयकत्वंस्वीकृत्यधूमाभाववा
न्पर्वत इत्यादिबाधबुद्धिदशायांतथाविधानुमित्यपलापस्येष्टापत्तेरन्यथानुपपत्त्यांगीकारात्। प्रकृतेतुधू
मपरामर्शे किंचितावच्छेदकानिर्वचनेऽन्यथोपपत्तेरुपदर्शितत्वात्। तत्रानुमितौ वह्न्यंशेकालीनत्वसंबंधेनधूम
प्रकारकत्वमप्युपेयते तथाविधानुमितित्वज्ञानदशायांस्वानुमित्यपलापइष्टापत्तेरसंभवदुक्तिकत्वादितिनव्या
प्राचांमते वह्निविधेयकानुमितिधूमपरामर्शहेतुतायांस्वान्यलिंगकानुमितौव्यभिचारवारणायधूमपरा

६ 6

मर्शजन्यानुमितौ धूमस्यैव भानमभ्युपेयतामलं वह्निव्याप्तिभानाभ्युपगमेनेति न च नांगीक्रियत एव चानु
मितौ तन्मते व्याप्तिविषयकत्वमिति वाच्यं। अनुमितौ व्याप्तिविषयकत्वानभ्युपगमेऽस्मन्निवादेऽनुमितित्व
तिसल्लिंगपरामर्शस्य हेतुतायां व्यभिचारोपन्यासावसरे दीधितौ मणिकारोक्तस्य लिंगोपहितधानांशे भ्रम
त्वेपीत्यादिग्रन्थस्य व्याख्यानावसरेऽभ्युपगमवादः लिंगोपधानाभावात्। भावे व्याप्यत्वेन तत्र न तु धूम
त्वादिनेत्यादिमिश्रलिखनस्यासंगतत्वापत्तेः अनुमितौ व्याप्तिविषयकत्वमाचार्यमते स्वरससिद्धमिति तत्
त्रैष्ठार्यन्तेरसंभवादिति चेत्। अत्र केचित्। व्याप्तिर्नानाविधतया विनिगमनाविरहेण नानाविधव्याप्तिविशिष्ट
हेतुज्ञानानिश्चयानामेवानुमितिहेतुत्वस्यावश्यकत्वं तथा च आचार्यमते अनुमितौ व्याप्तिभानानां
गीकारे वह्निव्याप्त्यभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शे वह्निमदन्योन्याभाववदवृत्तित्वरूपव्याप्त्यवगा
हिपरामर्शे धूमोऽयं धूमवान्पर्वतो वह्निमानित्यनुमितेः स्वीकारे तेषां परस्परं व्यभिचारेण वह्न्यनुमितिं प्रति
धूमपरामर्शहेतुतायां निर्वक्तुमशक्यतया व्यनेन तद्व्याप्तिपरामर्शजन्यानुमितौ तद्व्याप्तिभानांगीकारस्या रा०प्र०
६

वच्छेदक इत्याहुः तदसत् लाघवेनानुमितिप्रति साध्यात्यन्ताभाववदवृत्तित्वरूपव्याप्त्यवगाहिपराम
र्शस्यैव हेतुत्वस्य कल्पनात् । लाघवं च जनकतावच्छेदकशरीरस्य । तथा हि । अनुमितिप्रति साध्याभाववदवृ
त्तित्वरूपव्याप्त्यवगाहिपरामर्शहेतुतामते द्रव्याभाववदवृत्तिधूमवान्पर्वत इत्यादिपरामर्शात् समवायसंबं
धावच्छिन्नवह्न्यभाववदवृत्तित्वावगाहिपरामर्शाच्च संयोगसंसर्गकपर्वतो वह्निमानित्यनुमितिवारणाय पर्वतो
दृश्यकसंयोगसंसर्गकवह्निविधेयकानुमितिप्रति समवायसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपि
तसंयोगसंबंधावच्छिन्नप्रतियोगितासंबंधावच्छिन्नप्रकारतानिरूपितत्वाभावप्रकारतानिरूपितत्वाधिक
रणप्रकारतानिरूपितवृत्तित्वप्रकारतानिरूपितत्वाभावप्रकारतानिरूपितधूमप्रकारतानिरूपितपर्वतविशे
ष्यताशालिनिश्चयत्वेन हेतुत्वमावश्यकं अनुमितिप्रति साध्यवदन्यावृत्तित्वावगाहिपरामर्शस्य हे
तुतामते वद्रव्यवदन्यावृत्तिधूमवान्पर्वत इत्यादिपरामर्शात् समवायसंबंधावच्छिन्नवह्निनिष्ठप्रतियोगिता
वच्छेदकताकभेदाधिकरणावृत्तित्वावगाहिपरामर्शात् संयोगसंसर्गकपर्वतो वह्निमानित्याकारकानुमि

७ तिवाररणायसंयोगसंसर्गकपर्वतोद्देश्यकवह्निविधेयकानुमितिंप्रतिसमवायसंबंधावच्छिन्नवह्नित्वनिष्ठाव
च्छेदकतानिरूपितसंयोगसंबंधावच्छिन्नवह्निनिष्ठावच्छेदकतानिरूपितप्रतियोगितासंबंधावच्छिन्नप्रकारता
निरूपि[illegible]प्रकारतानिरूपिताधिकरणानिष्ठप्रकारतानिरूपितह्रदत्वप्रकारतानिरूपितस्वभावप्र
कारतानिरूपितधूमप्रकारतानिरूपितपर्वतविशेष्यताशालिनिश्चयत्वेनैवहेतुत्वमित्यस्मन्याभावघटितव्या
प्यवगाहिपरामर्शांशस्यहेतुतामते एकावच्छेदकत्वांशस्य एकानिरूपितत्वांशस्य निवेशाधिक्ये नत्वनुमितिज
नकतावच्छेदकशरीराधिक्यस्य स्यावश्यकतयातदपेक्षयास्वस्वताभावघटितोपदर्शितव्याप्त्यवगाहिपरा
मर्शस्यैवानुमितिहेतुत्वे तज्जनकतावच्छेदकशरीरलाघवस्य स्फुटत्वाद्द्वित्वादिकावार्यमनेनैवानुमि
तौव्याप्तिविषयकतायामुपदर्शितापत्तिः स्वव्याप्तेर्हेतुमात्रसंपादिकेतिध्येयं। केचित्तु अत्रानुमितौ व्याप्तिविषय
ताभ्युपगमेऽनुमितिप्रतिपरामर्शस्य स्वातंत्र्येण हेतुत्वकल्पनमेवलाघवं। तथाहि व्याप्यवापमतेवह्निव्याप्य राम०
धूमवान्पर्वतोवह्निमानित्याद्यनुमितेर्वह्निव्याप्यधूमविशिष्टपर्वतत्वविशिष्टवह्न्यादिवैशिष्ट्यावगाहित्व ७

याविशिष्टे वैशिष्ट्यमिति रीत्या विषयताशालिबुद्धिं प्रति च विशेष्यतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वेन तत्र वि
शेष्यतावच्छेदकप्रकारकज्ञानविधया वह्निव्याप्यधूमप्रकारकनिश्चयस्यावश्यमपेक्षणीयतया धूमपरामर्श
शून्यकाले तथाविधानुमितेरुत्पत्त्यभावात् स्वानुमितिप्रति धूमपरामर्शादेः स्वातंत्र्येण हेतुत्वाकल्पनेन वह्निव्याप्य
धूमवान् पर्वत इत्यादिपरामर्शकाले वह्निव्याप्यधूमवान् पर्वतो घटवानित्यनुमित्यापत्तेः वह्निव्याप्यधूमवान् पर्व
त इत्यादिविशेष्यतावच्छेदकप्रकारकनिश्चयस्य वह्निव्याप्यधूमनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नवि
ष्यत्वाभिन्नवह्निव्याप्यधूमावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्नं प्रति हेतुत्वे न तस्याश्चापि तत्कार्यतावच्छे
दकाक्रान्तत्वादिति। न च वह्निव्याप्यधूमवान् पर्वतो घटवानित्यनुमित्यादेः कस्यापि तत्कार्यतानवच्छेदकतया त
दानीं तदवच्छिन्नोत्पत्तेरसंभवः वह्निव्याप्यधूमनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यत्वाभिन्नवह्निव्या
प्यधूमावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्नं प्रति इष्टमेव तदा वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमि
तेरेवोत्पत्तेरिति वाच्यं वह्निव्याप्यधूमवान् पर्वतो घटवानित्यनुमितिं प्रति सिसाधयिषाभावविशिष्टवह्निव्याप्य

८ ९

धूमवान्पर्वतो घटवानिति सिद्ध्यभावस्य हेतुत्वेन तदानीं सिद्ध्यभावरूपकारणाबलात्तथाविधानुमित्याप
त्तिर्दुरुद्धरैवेति । नचाचार्यमते तादृशानुमितेरप्रसिद्ध्या तथाविधानुमितिं प्रति तथाविधसिद्ध्यभावस्य हेतुत्वक
ल्पनमप्यसंभवदुक्तिकमिति वाच्यं । तन्मते तादृशानुमितेरप्रसिद्ध्या तथाविधानुमितिं प्रति तथाविधसिद्ध्यभाव
स्यस्य हेतुत्वेपि वह्निव्याप्यधूमवान्पर्वतो घटव्याप्यवानिति परामर्शकाले वह्निव्याप्यधूमवान् घटव्याप्यवान्पर्व
तो घटवानित्यनुमितेः प्रसिद्धतया वह्निव्याप्यधूमातिरिक्तघटव्याप्यातिरिक्तपर्वतत्वातिरिक्तधर्मानवच्छिन्नविशे
ष्यतानिरूपितघटनिष्ठविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति तथाविधानुमितिविषयकेच्छाभावविशिष्ट
वह्निव्याप्यधूमवान् घटव्याप्यवान्पर्वतो घटवानित्यादिसिद्ध्यभावस्यावश्यं हेतुत्वपातद्बलात्तद्वह्निव्याप्य
धूमवान्पर्वत इति परामर्शकाले तद्धर्मवत्त्वापन्नौ क्रियमाणायां तादृशानुमित्यापत्तेर्वक्तुमशक्यत्वात् । न
च तादृशसिद्ध्यभावस्य वह्निव्याप्यधूमावच्छिन्नघटव्याप्यावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितघ
टविधेयताशाल्यनुमितित्वमेव कार्यतावच्छेदकमस्तु किमुपदर्शितविशिष्टाभावघटितधर्मस्य कार्यतावच्छे

दकत्वेनेति तादृशानुमितेस्सदनाक्रान्ततयातदानापत्तिः व्यानादृशानुमितित्वावच्छिन्नस्याप्यापत्तिः तादृश
ज्ञानोपयोगि वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वत इति विशेष्यतावच्छेदकप्रकारकनिश्चयाभावो हि तिका
ऽलं तथा सति तथाविधसिद्धिकाले घटव्याप्यवान् वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानित्याधि
कविषयिताया अनुमितेस्स्यात् तथाविधविशिष्टमिभावघटितधर्मस्यासिद्ध्यभावर्यतावच्छेदकत्वस्याव
श्यकत्वात् इति चेन्न वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानित्यतादृशसिद्ध्यभावेन फलजननेन व
ह्निव्याप्यधूमवान्पर्वतो घटव्याप्यवानित्यादिपरामर्शस्य सहकारित्वकल्पनात् वह्निव्याप्यधूमवान्पर्वत इ
त्येतादृशपरामर्शकाले तथाविधासिद्ध्यभावबलात् तादृशानुमित्यापत्तेरसंभवात् अनुमितौ व्याप्तिविषयतान
भ्युपगमे तु तस्या धूमादिविशिष्टेतरवैशिष्ट्यावगाहितया तत्र च धूमवान्पर्वत इत्यादिज्ञानस्य विशेष्यता
वच्छेदकनिर्णयविधया स्वपेक्षितत्तया वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्यकालीन धूमवान्पर्वत
इति निर्णायिकाले धूमवान्पर्वतो वह्निमानित्याद्यनुमित्यापत्ते दुर्वारत्वाद् अनुमितौ व्याप्तिविषयकत्वमावा

६ र्येमनेनिर्दुष्टमित्याहुः तदसत्। तथाहि विशेष्यतावच्छेदकप्रकारकनिर्णयस्य कार्यतावच्छेदकं न विशिष्ट
वैशिष्ट्यावगाहिज्ञानत्वं तथाविधानुभवत्वं वा आद्ये घटस्मृतौ व्यभिचारात् द्वितीये नित्यसाधारण्यात्। न च
१ जन्यत्वं तत्कार्यतावच्छेदककोटौ निवेशनीयमिति वाच्यं जन्यत्वस्य ध्वंसप्रतियोगित्वप्रागभावप्रतियो
गित्वकालिकसंबंधेन घटत्वादिमत्त्वभेदेन बहुविधतया तेषां विनिगमनाविरहेण निवेशने नानाकार्य
कारणभावानन्त्यप्रसंगात्। किं तु विशेष्यतावच्छेदकप्रकारकनिर्णयकार्यतावच्छेदककोटिप्रविष्टत
यार्थ ईश्वरप्रत्यक्षादिव्यावृत्तजन्यस्मृत्यादिमत्त्वसाधारणीमेकां जातिं स्वीकृत्य सैव तत्कार्यतावच्छेदिकांगी
कार्या। एवं वायवार्यमते वह्निव्याप्यधूमप्रकारकनिर्णयपर्वतविशेष्यतावच्छेदकनिर्णयकार्यतावच्छेदका
नाक्रान्ततया तथाविधानुमितेर्धूमे परामर्शोत्पत्तिकालेऽप्युत्पत्तिवारणाय अनुमितिं प्रति धूमपरामर्शस्य
स्वातन्त्र्येण हेतुत्वकल्पनमावश्यकमेवेति तन्मतेऽप्यनुमितौ व्याप्तिविषयताभ्युपगमे उपदर्शितलाघवा राम०
वकाश इति। अत्रेदं समाधानमाकलयामः नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे सत्ताविरहात् विशिष्ट ६

वैशिष्ट्यविषयताशालित्वानुभवत्वमेव विशेष्यतावच्छेदकप्रकारकनिर्णयकार्यतावच्छेदकमुच्यते तथा
कस्याचार्यमते व्याप्तिविषयताभ्युपगमे तु पद्दर्शितलाघवं निष्प्रत्यूहमेवेति । ननु भित्त्यवच्छिन्नतस्य कार्य
तावच्छेदकत्वे कारणतानुपपत्तिः तद्घटादिकारणत्वं हि यदिच्छन्नान्यथासिद्धकारणत्वं हि यदिच्छन्नान्यथासि
द्धत्वसति कार्यव्यवहितपूर्वक्षणावच्छिन्नकार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तद्‌क
घटरूपकार्याधिकरणव्यवहितपूर्वक्षणावच्छेदेनापरघटरूपकार्याधिकरणे दण्डाभावसत्त्वात् । घटं प्रति
दण्डत्वेन हेतुतायामनुपपत्तिः तस्मात्कार्यतावच्छेदकावच्छिन्नयावद्व्यक्त्यक्षणावच्छेदेनापरपटरूपका
र्याधिकरणे दण्डाभावसत्त्वात् पटं प्रति दण्डत्वेन हेतुतायामनुपपत्तिः तस्मात्कार्यतावच्छेदकावच्छे
देन यावतीस्तत्तद्व्यक्तित्वेन धृत्वा समस्ततदव्यवहितपूर्वक्षणावच्छिन्नतद्व्यक्त्यधिकरणवृत्तित्वावच्छिन्नप्रतियोगिताभावप्रति
योगितानवच्छेदकधर्मवत्त्वमेव कारणत्वम् । तथा च निरुक्तनिधर्मस्य कार्यतावच्छेदकत्वे नित्यव्याप्ते
रपि तत्तद्व्यक्तीनां ततः पातिनयात तद्व्यवहितपूर्वक्षणाप्रसिद्धेः प्रकृते कारणत्वानुपपत्तिरिति चेन्न ।

१०
10

कार्यतावच्छेदककारणतावच्छेदकभेदेनकारणताया भिन्नत्वात् । पत्रनित्यवृत्तिधर्मः कार्यतावच्छेदकः
तत्रनित्यस्यव्यक्तितिरिक्तव्यक्तीनामेवतत्तद्व्यक्तित्वेननिवेशान्नानुपपत्तिः । अधोधीतिकेचित्तन्न अनुमितिप्रति
परामर्शस्यस्वातंत्र्येणहेतुत्वेएकपर्वतविशेष्यकवह्निव्याप्यवत्तानिर्णयात्पर्वतांतरेविशेष्यकव
ह्निविधेयकानुमित्यापत्तेः विशिष्टवैशिष्ट्यबुद्धौविशेष्यतावच्छेदकप्रकारकनिर्णयस्यधर्मिविशे
षणतंत्रभावेहेतुत्वकल्पकल्पनेननोपदर्शितापत्तिवारणसंभवादितिधर्मिविशेषणतंत्रभावस्या
नुमितिंप्रतिस्वातंत्र्येणहेतुत्वकल्पनावश्यकत्वेऽलम्नुमितौव्याप्तितदाश्रयसत्ताकपर्वतेवह्नि
व्याप्यधूमपरामर्शात्पर्वतांतरेवह्निविधेयकानुमितिर्नजायतेइतिकेनापिरीत्यनेनतद्वारणार्थं
धर्मिविशेषणतंत्रभावस्यानुमितिपरामर्शयोः स्वतंत्रहेतुहेतुमद्भावः कल्पनीयः भवतुवात
थानुभवात्तथापिविशिष्टवैशिष्ट्यबोधविशेष्यतावच्छेदकप्रकारनिर्णययोरेवधर्मिविशेषणतंत्रभा राम०
वकार्यकारणभावकल्पनेनेवोपदर्शितवारणसंभवादनुमितिंप्रतिपरामर्शस्यस्वतंत्रहेतुत्वक १०

ल्पनानिरर्थकैवेति। न च तथा सति एकपर्वतविशेष्यकवह्निव्याप्यवत्तानिर्णयात् पर्वतांतरविशेष्या
कविशिष्टवैशिष्ट्यबोधानुदयप्रसंग इति वाच्यं इष्टापत्तेरनुभवस्य शपथनिर्णेयत्वात्॥ यत्तु पर्वतत्वसामा
नाधिकरण्येन वह्निव्याप्यवत्तानिर्णयादवच्छेदकावच्छेदेन तथाविधविशिष्टवैशिष्ट्यावगाहिबोधव
त्त्वसिद्ध्यभावादिबलात्पर्वतत्वावच्छेदेन वह्निविधेयकानुमितेरस्यापत्तेरिति तत्रावच्छेदकावच्छेदेनानु
मितिं प्रति अवच्छेदकावच्छेदेन परामर्शस्य स्वातंत्र्येण हेतुत्वकल्पनमावश्यकमिति किंतु तत्रानुमितौ
व्याप्तिविषयमेतितत्तदसत् सिद्ध्यभावेन तथाविधानुमितिजननेप्युक्तसंयोगसंबंधघटितवह्निव्यापकता
वगाहिपरामर्शयोरन्यतरस्य सहकारित्वकल्पनेन तदानीमवच्छेदकावच्छेदेन स्वावच्छिन्नसंयोगसंसर्गा
के हेतुमत्तावगाहिपरामर्शत्वावच्छिन्नसंयोगसंबंधघटितवह्निव्यापकतावगाहिवह्न्यनुमित्यापत्तिवा
रणासंभवात्तत्र यानुमितिं प्रति परामर्शस्य स्वातंत्र्येण हेतुत्वाकल्पने अनुमितौ विधेयतानुपप
त्तिर्विशेष्यतावच्छेदकनिर्णायकायेतावच्छेदककोटौ विधेयतायामनिवेशादिति चेन्न॥ सिषाधयिषाविर

११ द्दविशिष्टसिध्यभावस्यकार्यतावच्छेदकत्वात्‌विधेयतायाअनुमितौविधेयताशालित्वोपगमेतेःसिध्यभावका
र्य्यतावच्छेदककोटौतुविधेयतानिवेशस्यावश्यकः अन्यथापर्वतोवह्निमानित्येताहृशसिद्धिकालेवह्निध
॥ र्म्मितावच्छेदकीकृत्यपर्वतविधेयकानुमित्यनुपपत्तेरितिध्याताकुः। आचार्यमतेऽप्यनुमितौव्याप्तिविषय
तानभ्युपगमेऽपिविशिष्टवैशिष्ट्यमितिरीत्यावह्निव्याप्यधूमपर्वतत्वोभयधर्मितावच्छेदकीकृत्यवह्निव्याप्य
धूमप्रकारकात्‌वह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधूमवान्इत्याकारकपरामर्शान्‌वह्निव्याप्यधूम
वान्पर्वतोवह्निमानित्यनुमितिर्निर्वाह्यपत्तस्यानुमानंप्रतिस्वातंत्र्येणहेतुत्वकल्पनेगौरवंतदनभ्युप
गमेतुतदापिद्वपर्वतत्वधर्मितावच्छेदककवह्निव्याप्यधूमपरामर्शस्यावश्यकत्वात्‌तन्मात्रात्‌ततोवह्नि
व्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिनिर्वाहेनयाविषयपरामर्शस्यस्वतंत्रहेतुत्वंनकल्प्यतइतिस्वा
ववाद्‌अनुमितौव्याप्तिविषयत्वासिद्धिः नवतयाविधपरामर्शदशायामाचार्यमतेऽपिवह्निव्याप्यधूमवा रा०म०
न्पर्वतोवह्निमानित्यनुमितिस्वीकारेविनापरामर्शमतावैलक्षण्यापत्तिरितिवाच्यंतेनरूपेणतदभावा ११

त्त।केचित्तुस्वनुमितौव्याप्तिविषयतानम्युपगमेवह्निव्याप्यालोकवान्पर्वतइत्यादिपरामर्शकाले
वह्निव्याप्यधूमवत्पर्वतोमाविनाभाववानित्यादौतत्त्वाधदशायांवह्निव्याप्यधूमपर्वतत्वोभयंधर्मितावच्छे
दकीकृत्यवह्निविधेयकानुमित्त्युपपत्तयेतथाविधानुमितित्वावच्छिन्नप्रतितथाविधेतरवाधस्यस्वातं
त्र्येणहेतुत्वकल्पनेगौरवंतदंगीकारेतथाविधेतत्त्वाधदशायांपर्वतविशेष्यकवह्निव्याप्यधूमप्रकारकनिर्श्च
यात्मकपकत्वात्ततएवतथाविधानुमित्युत्पत्तेः तथाविधेतरवाधस्यानुमितिंप्रतिस्वतंत्रहेतुत्वाकल्पनप्रसक्त
त्वाद्यमस्तत्तमेवसाज्ज्ञः तदसत्। स्वनुमितिंप्रतिपक्षमुख्यविशेष्यकपरामर्शस्यैवहेतुतयास्वनुमितौव्या
प्तिविषयताभ्युपगमेपितथाविधानुमितिंप्रतितथाविधेतरवाधस्यस्वातंत्र्येणहेतुत्वकल्पनप्रावश्यक
मेवनचानुमितिजनकतावच्छेदककोटौमुख्यविशेष्यतायानिवेशेप्रयोजनाविरहइतिवाच्यंतथासत्यनु
मितिजनकतावच्छेदककोटौवह्निव्याप्यधूमवत्पर्वतत्वानयंदेशइत्याप्रतताहार्यनिर्णयकालीनातत्त्वाद्याहिताद्यवच्छिन्नत्वाव
च्छिन्नप्रतियोगितिताकभेदकूटस्यानिवेशनत्वाधवसमवानतनवोचार्यमतेपक्षमुख्यविशेष्यकपरामर्शस्य

१२ 12

नुमितिहेतुत्वेनुपदर्शितेनेतरबाधानां चानुमितिप्रतिबन्धकत्वात्तत्र हेतुत्वकल्पनाधिक्येन लाघवसंभवः इति वा
च्योऽस्त्वनुमितिजनकतावच्छेदककोटावनन्तर्भावितत्वाविच्छिन्नप्रतियोगिताकभेदकूटनिवेशे ध्यो विशे
षणाविशिष्टभावे विनिवामनाविरहे राश्वनन्तकार्यकारणभावलाघुत्वात्कारणतावच्छेदकगौरवाध
तये भयानथा विधेरबाधानां किंयतामनुमितिं प्रति स्वातन्त्र्येण हेतुत्वकल्पनमेवोचितमिति चेत् तद्वयाकानु
मानेविधिविरहियन्न धर्मिवैशिष्ट्यपर्यन्तमुख्यविशेष्यकपरामर्शस्यैवास्त्वनुमितिहेतुमुक्तसिस्मयिसंगच्छते।
स्वसम्यात्तादृशान्यविरोधस्य ब्रह्मणोऽपि तु: समावेयत्वादिति न किंचिदेतत्।। केचित्तु आचार्यमतेऽनुमि
तौ व्याप्तिविषयतास्वीकारेपि लिङ्गपरामर्शजन्यानुमितिप्रतिअनुमित्साविरहविशिष्टायाः प्रत्यक्षेण
विशिष्टायाः वह्निव्याप्याभाववान्पर्वतो घटवान्इत्येतादृशविशिष्टवैशिष्ट्यबाधात्मकप्रत्यक्षसा
मग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवसंभवात्पर्वतो घटवानित्यादिविशिष्टवैशिष्ट्यबोधात्मकप्रत्यक्ष राम०
सामग्र्याप्रतिबन्धकत्वाकल्पनेन लाघवसंभवाभवात् तादृशसामग्रीकाले वह्निव्याप्याभाववान्पर्वत इति १२

निर्रोपस्यविशेषतावच्छेदकप्रकारकनिर्रोपविषयाया आवश्यकत्वेन तदा वह्निव्याप्यधूमप्रकारकपर्वतवि
शेष्यकज्ञानप्रतिबंधकीभूतबाधनिर्रोपत्वात्तद्भूलादेस्तथाविधानुमित्यापत्तेर्वारणासंभवात्तथाविधा
नुमितिं प्रति तथाविधप्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनं प्रयोजनविरहेण लाघवसंभवात् अनुमि
तौ व्याप्तिविषयतायाः अनभ्युपगमे तु वह्निव्याप्याभाववान् । इति ज्ञानस्य धूमवान्पर्वतो वह्निमानिति
ज्ञानाप्रतिबंधकतया तथाविधसामग्रीकाले तथाविधानुमित्यापत्तेः प्रकारांतरेण वारणासंभवात् धूमवा
न्पर्वतो वह्निमानित्यनुमितिं प्रति तथाविधसामग्र्याः प्रतिबंधकत्वकल्पनमावश्यकमिति गौरवात् आचार्य
मते अनुमितौ व्याप्तिविषयतास्वीकारः आवश्यक इत्याहुः तदसत् अनुमितौ व्याप्तिविषयतानभ्युपगमे
पि धूमवान्पर्वतो वह्निमानित्यनुमितिं प्रति तथाविधसामग्र्याः स्वतंत्रप्रतिबंधकत्वाकल्पनेनानुमितौ व्या
प्तिविषयताभ्युपगमे पूर्वोपदर्शितलाघवस्यासंभवात् ॥ तथा हि अनुमितौ व्याप्तिविषयताभ्युपगमे पि व
ह्निव्याप्यधूमवान् इत्याकारकपरामर्शादिजन्यानुमितौ अवश्यं तथाविधसामग्र्याः प्रतिबंधकत्वं कल्प

१३ नीयं॥ अन्यथा तादृशसामग्रीकाले तथाविधानुमित्यापत्तेर्दुर्वारत्वात् एवं चानुमितौ तदनभ्युपगमेपि तत्र त
दृशसामग्र्याः प्रतिबंधकत्वे कल्पनीये द्रव्यत्वादिधर्मितावच्छेदकमनिवेश्य धूमनिष्ठप्रकारतानिरूपितधर्
13 मितावच्छेदकतासंबंधेन वह्निविधेयकानुमितिप्रतिबंधीयानुमितिनिष्ठविशेष्यतानिरूपितविशेष्यकत्वप्र
कारतानिरूपितावच्छिन्नत्वप्रकारतानिरूपितप्रकारतासंबंधेनावच्छिन्नप्रतियोगिताकेच्छाभावविशिष्टप्र
त्यक्षेच्छा विशिष्टतथाविधप्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनेपि वह्नित्वप्रत्यक्षसामग्रीकाले धूमवान्पर्वतो
वह्निमानितिमनुमितिवारणासंभवात् तथाविधानुमितिप्रति तथाविधप्रत्यक्षसामग्र्याः प्रतिबंधकत्वं स्वा
तंत्र्येणानकल्पतइति कुर्गौरवावकाशः तथैव तथाविधप्रत्यक्षसामग्र्याः तत्कारणविशिष्टविशेष्यतावच्छेद
कप्रकारकनिरायात्मिकाप्प्यायाः अभावस्य पर्वतादौ संबंधासत्वेनेतत्सामग्रीकालेपि पर्वतत्वादौ तदभा
वसत्वात्। विशेष्यकतावच्छेदकतासंबंधेन वह्निविधेयकानुमित्यापत्तिर्दुर्वारैति वाच्यं तत्रैककालीनस्वसं राम०
बंधेन तथाविधसामग्र्याः प्रतिबंधकत्वकल्पनात् तत्रैकमुहूर्तीयानुमितिसामग्रीकाले पुरुषांतरीय १३

तथाविधप्रत्यक्षसामग्रीकालेनतत्पुरुषस्यानुमित्यनुत्पत्तिरितिवाच्यं।ततत्पुरुषीयत्वंनिवेश्यप्रति
बध्यप्रतिबंधकत्वावकल्पनात्‌नैवगौरवावकाशः तत्तत्पुरुषीयत्वादेरपिपक्षमितावच्छेदकतयात्रात्म
नित्रमासीतकल्पनेपिपुरुषभेदेनत्कार्यकारणभावद्वाहुल्यस्यावश्यकत्वात्॥सर्वतत्वादिभेदेनप्रतिब
ध्यप्रतिबंधकभावकल्पनायांपुनराधिक्यादिति॥अपरेतु॥अनुमितौव्याप्तिविषयत्वानभ्युपगमेतेजोव्या
प्यधूमवान्पर्वतइत्यादिपरामर्शकालेवह्निभिन्नतेजोभाववान्पर्वतइत्यादौतरवाधदशायामपिधूमवत्वा
त्पर्वतोवह्निमानित्यनुमित्युत्पत्त्यापत्तेःतत्रैवव्यभिचारेराधूमवान्पर्वतोवह्निमानितिमितिंप्रतिधूमपरामर्श
स्यहेतुताभावप्रसंगः अनुमितौव्याप्तिविषयत्वाभ्युपगमेतुवह्निव्याप्यधूमवान्पर्वतोवह्निमानइ
त्याद्यनुमितिंप्रतिधूमपरामर्शस्यहेतुतयातेजोव्याप्यधूमवान्पर्वतइत्यादिपरामर्शकालीनतथाविधेत
रवाधजन्यतेजोव्याप्यधूमवान्पर्वतोवह्निमानित्याद्यनुमितेधूमपरामर्शकार्यतावच्छेदकाक्रांततया
व्यभिचाराभावेनउपदर्शितवाधकाभावादिति॥नचतथाविधपरामर्शकालीनतथाविधेतरवाधवल

१४ 15 द्वह्नित्वावच्छिन्नविधेयकानुमितिसंदेवानुमितौव्याप्तिविषयतानभ्युपगमेऽस्मद्दर्शितदोषसंभवस्तदेवनकिं
तुल्यवदनुमितौव्यापकतावच्छेदकरूपेणैव।वचविधेयभानानुपगमेनतन्नतेजस्त्वरूपेणैववह्निविधेयकानुमितेरंगी
कारादितिवाच्यं॥ तथाविधपरामर्शकालीनतादृशेतरबाधजन्यानुमितिवृत्तरंपर्वतोवह्निमान्नवेतिसंशया
भावस्यानुभवसिद्धत्वात्तत्सत्त्वात्पर्यमेवशंपतत्रवह्नित्वादिरूपेणावह्निविधेयकानुमितेरवश्यमंगीकार्यत्वा
त्॥ नचतथासति उपदर्शितनियमभंगापत्तिरितिवाच्यं लाघवतानेतरबाधातिरिक्तस्थलेतथाविधेयमभ्युप
गमात् अत एव व्यापकतावच्छेदकमपिरूपं लाघवादितानवच्छिन्नानुमितौभासतइतिप्रवादोपिसंगच्छते
तथाचानुमितौव्याप्तिविषयतायामुपदर्शितयुक्तिर्निराबाधैव॥ परंतुतथाविधस्थलेबाधजन्यानुमितौचपर्व
तेवह्नित्वस्यैवतेजस्त्वस्यापि भानांगीकारात्॥ तत्रतेजस्त्वस्यैवविधेयतावच्छेदकत्वस्वीकृतेः॥ ननुवह्नित्वे
नानुमितौव्यापकतावच्छेदकत्वेनगृहीतस्यधर्मस्यविधेयतावच्छेदकत्वनियमात् तथाचधूमपरामर्शज राम०
यतावच्छेदककोटौवह्नित्वावच्छिन्नविधेयतानिवेशनेनैवतथाविधानुमितौव्यभिचारवारणासंभवात्तस्य १४

नुमितौ व्याप्तिविषयत्वं निर्युक्तिकमेवेति तदसत् अत्र तथाविधेतरबाधज्ञस्यानुमितौ तेजस्त्वस्येव वह्नित्व
स्यापि विधेयतावच्छेदकत्वे व्युत्पत्तिविरहात् अत्र तेजस्त्वविशिष्टवह्निव्याप्यवह्निमित्रं तेजोभाववत्पर्व
तकालीनं तेजोव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्यापि तेजस्त्वविशिष्टवह्निमान्पर्वत इत्यनुमितिप्रति
स्वातंत्र्येण हेतुत्वं न कल्प्यते तादृशपरामर्शकाले तथाविधेतरबाधकालीनतेजोव्याप्यधूमवान्पर्वत इ
त्याकारकपरामर्शत्वावच्छिन्नस्यावश्यकतया तद्बलाद्वह्नित्वतेजस्त्वोभयधर्मावच्छिन्नविधेयताका
नुमित्युत्पत्त्यैव तथाविधफलनिर्वाहात् ॥ यथाविधेतरबाधजमानुमितौ वह्नित्वस्य विधेयतानवच्छेदक
ताकानुमित्युत्पत्त्यैव तथाविधफलनिर्वाहात् ॥ यथाविधेतरबाधजमानुमितौ वह्नित्वस्य विधेयतानवच्छेदक
त्वे तु उपदर्शितपरामर्शकाले तदुभयावच्छिन्नविधेयताकानुमितेरानुभविकतया तन्निर्वाहार्थं उभयधर्मा
वच्छिन्नविधेयताकानुमितिं प्रति तथाविधपरामर्शस्य स्वतन्त्रहेतुत्वकल्पनस्यावश्यकतया गौरवस्य
व्रह्मनरापि दुर्वारत्वात् तथा चानुमितौ व्याप्तिविषयतानभ्युपगमे तथाविधेतरबाधजमानुमितेरप्रि

१५ मपरामर्शेजन्यतावच्छेदकवह्नित्वावच्छिन्नविधेयताकानुमितित्वरूपकार्यतावच्छेदकाक्रांततथाधूमपराम
15 र्शहेतुतायां तत्र व्यभिचारस्यावश्यकत्वात् तद्वारणार्थं अनुमितौ व्याप्तिविषयताभ्युपगमस्यावश्यकइ
तिनेवम् उद्वह्नित्वावच्छिन्नविधेयताशालिन्यनुमितित्वस्य वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य कार्य
तावच्छेदकतया तथाविधेतरबाधतत्त्वानुमितौ व्यभिचारस्य दुर्वारत्वात् तद्वारणार्थं आचार्यमते अनुमि
तौ व्याप्तिविषयतांगीकारः समुक्तिकरातिनाहुः ॥ यत्तु अनुमितौ व्याप्तिविषयत्वा॥ भाववन्नवच्छिन्नसंयो
गसंसर्गीयस्ति व्यापकतावगाहिसंयोगसंसर्गकधूमवत्तावगाहिपरामर्शस्य हृदसंयोगसंबंधघटितवह्नि
व्यापकतावगाहि अवच्छिन्नसंसर्गकधूमवत्तावगाहिपरामर्शयोः परस्परकार्यकारणभावेन तयोः परस्प
रत्र मामितौ व्यभिचारदुर्वारः तथाविधपरामर्शव्यापकाकारकधूमप्रकारकपर्वतोद्देश्यकवह्निविधे
यकावच्छिन्नसंयोगसंसर्गकानुमितेरुत्पादनात् । न च मुद्दसंयोगसंसर्गघटितव्यापकतोतगाहि अवच्छि एम०
न्नसंयोगादिसंसर्गकधूमवत्तावगाहियेरामर्शात् वच्छेदकावच्छेदेनानुमितेरुक्तरूपायाः नरूपणमा १५

त्रानुपपत्तिरितिवाच्यं॥मिश्रैस्तत्सत्ताद्यस्त्ववच्छेदकावच्छेदेनत्वनुमितेरुपगमात्तन्मतेऽप्रदर्शितत्वेऽप
ग्यद्वयोरत्वात्स्वतएवानुमितिलक्षणासम्भमानुमितेरलक्ष्यत्वयहेयदिघसलियंपरामर्शात्क्षित्यादिपृ
थिव्यांसुद्धसम्भवायादिघटितगंधव्यापकतावगाहिगंधप्रागभावकालावच्छिन्नसमवायसंसर्गकगंधव
विधेयकभ्रमात्मकानुमितावतिव्याप्तिवारणायापिदीधितासंसगच्छते॥ स्वत्वन्यथातुल्यपुष्कलतादशपर
मर्शादप्यवच्छेदकावच्छेदेनतयाविधभ्रमानुमितेरनुदयात्तत्रातिव्याप्तिवारणार्थदीधितिकारस्ततयात्र
यासः प्राप्तसरएवस्यादिति॥ नचमूलेद्धसंयोगावच्छिन्नसंयोगोसंयोगत्वेननिवेश्यतयाविधानुमितिंप्रति
यद्दर्शितपरामर्शयोरेकरूपेराहत्वत्वात्तत्परस्पराभिचारावकाशइतिवाच्यं॥ स्ववच्छिन्नसंयोगसंबध
घटितताप्रामाण्यग्रहकालेस्त्रवच्छिन्नसंयोगसंसर्गघटितव्यापकतावगाहिपरामर्शदशायांत्वनाभि
त्यापत्तिवारणायपरन्तुद्धसंयोगसंसर्गघटितताप्रामाण्यग्रहकालेमूलेद्धसंयोगसंसर्गघटितव्यापकताव
गाहिपरामर्शादनुमित्यापत्तिवारणायचतथाविधप्रामाण्यग्रहाणामेकत्रोत्तेजकत्वेएकसंसर्गकव

१६ टिताभाभावारोपग्रहकाले: परसंबंधघटितव्यापकतावगाहिपरामर्शोदनुमितेरनुदयप्रसंगेन तेन तेषां वि
16 शिष्योतेजकत्वं स्वीकृत्यविशिष्यतथाविधपरामर्शयोः कारणत्वस्यवक्तव्यत्वात्तथाविधे दोषस्य
दुरुद्धरत्वात्॥ अनुमितौ व्याप्तिविषयतांगीकारे तु स्ववच्छिन्नसंयोगसंसर्गघटितव्यापकताघटितधूमव
गाहिपरामर्शस्य तथाविधव्याप्त्यवगाह्यनुमितिं प्रति हेतुत्वकल्पनेन धूमवद्संयोगसंबंधघटितव्याप
कताघटितव्याप्त्यवगाह्यवच्छिन्नसंयोगसंसर्गकधूमवत्ताज्ञानावगाहिपरामर्शस्य तथाविधव्याप्त्यवगा
ह्यनुमितिंप्रतिहेतुत्वकल्पनेन वतयोः परस्परजन्यानुमितौ न व्यभिचार इति सिद्धमनुमितौ व्याप्ति
विषयकत्वमिति॥ तदनौचित्यं॥ धूमवद्संयोगसंबंधघटितवह्निव्यापकतावगाह्यवच्छिन्नसंयोगसंब
धघटितधूमवत्तावगाहिपरामर्शात् संयोगावच्छिन्नत्वावच्छेदकीभूतपर्याप्तत्ववत्वोभयसंबंधेन पर्वतो वह्नि
व्यापकवह्निविधेयकानुमितेरुत्पाराभ्युपगमप्रमाणस्याऽएव मेकृतेः स्ववच्छेदकावच्छेदेनानुमितेः स्वस राम० 
पत्वात्तेन न स्ववच्छिन्नसंयोगघटितवह्निव्याप्यकतावगाहिपरामर्शहेतुताया व्यभिचारस्ववच्छिन्नेन्ना १६

ससर्गकवह्निविधेयानुमितेरुत्पादात् तथाविधानुमितिप्रतितितास्य हेतुत्वात् तथाचाचार्यमतेऽस्मन्नमि
तेऽव्याप्तिविषयतानभ्युपगमेऽपि यद्यदर्शितपरामर्शीयोः परस्परहेतुतायाय स्सरजमानुमितौ उपदर्शि
तरीत्या व्यभिचारवारणासंभवादित्यलं बहूक्तलत्वने नन्वनुस्वाचार्यमते पर्वतो वह्निमानित्यादिसिद्धेः प्र
तिबध्यतावच्छेदकं स्यादुर्वचत्वप्रसंगः तथाहि तस्याः प्रतिबध्यतावच्छेदकं न पर्वतत्ववह्नि प्रविशेष्यकव
ह्निविधेयकानुमितित्वं तथाविधासिद्धिकाले नीलपर्वतो वह्निमानित्यनुमितेरनुदयप्रसंगात्॥ नापि
पर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितवह्निनिष्ठविधेयताशालिन्यनुमितित्वं तस्याः प्रति
बध्यतावच्छेदकं। वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शजन्यानुमितेरसंग्रहापत्तेः॥ तस्याः पर्वतत्वा
तिरिक्तवह्निव्याप्यधूमावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताशालित्वेन तत्प्रतिबध्यतावच्छेदकाना
क्रान्तत्वात्॥ नापि वह्निव्याप्यधूमातिरिक्तपर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितवह्निनिष्ठ
विधेयताशालिन्यनुमितित्वं तथाविधसिद्धिप्रतिबध्यतावच्छेदकं वक्तव्यं तथा सति पर्वतो वह्निमा

१७ 17 नियमानित्यादिसिद्धिकाले वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शेन तमवह्निव्या
प्यधूमवान्पर्वतो वह्निमानित्याद्यनुमितेरनुत्पत्त्यापत्तिराचार्यमते तेन तत्र चिंतामणिकारसंमतानुमि
तेरंगीकार्यत्वात्क्षितिरेवमेवं ।। आचार्यमते पर्वतो वह्निमानित्यादिसिद्धेः पर्वतत्वातिरिक्तधर्मानवच्छिन्नोद्दे
श्यतानिरूपितवह्निविषयताशालित्वानुमितित्वावच्छिन्नप्रतिप्रतिबंधकत्वाभ्युपगमात् ।। वह्निव्याप्यधू
मवान्पर्वत इत्यादिपरामर्शजन्यानुमितेरुद्देश्यतावच्छेदकत्वस्यमुद्दपक्षतत्वे एवांगीकारात्तत्तस्यानन्त
व्यतिवध्यतावच्छेदकानां कांतत्वप्रसंगः ।। वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानित्यादिपरा
मर्शजन्यानुमितेरुद्देश्यतावच्छेदकत्वस्य वह्निव्याप्यधूमेऽपि सत्त्वेन तस्याप्यपि न तथाविधासिद्धेप्र
तिवध्यतावच्छेदकानां कांतत्वप्रसंगश्चेति स्वाचार्यपत्तिनिगर्वेः ।। अत्र नैयायिकाः ।। वह्निव्याप्यधूमवान्प
र्वत इत्यादिपरामर्शात् वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिस्वीकारे मानाभावः न च त रा०म०
स्मात्तथाविधानुमितिस्वीकारेऽमालिंगकपरामर्शजन्यानुमितौ व्यभिचारवारणाय धूमपरामर्शजन्य १७

तावच्छेदककोटौ स्वाव्यवहितोत्तरत्वं न निवेश्यत इति लाघवतर्कसहकृतमनुमानमेव प्रमाणमिति वाच्यं
